# shrI chandrashekharendrasarasvatI stuti

# શ્રીચન્દ્રશેખરેન્દ્રસરસ્વતીસ્તુતી

## Document Information

Text title : chandrashekharendrasarasvatistuti

File name : chandrashekharendrasarasvatistuti.itx

Category : deities_misc, gurudev, stotra

Location : doc_deities_misc

Author : Shri Vijayendra Sarasvati

Transliterated by : Manda Krishna Srikanth http://krishnasrikanth.in/

Proofread by : Sunder Hattangadi

Latest update : May 13, 2012

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 21, 2020

*sanskritdocuments.org*

# શ્રીચન્દ્રશેખરેન્દ્રસરસ્વતીસ્તુતી

શ્રુતિસ્મૃતિપુરાણોક્તધર્મમાર્ગરતં ગુરુમ્ ।
ભક્તાનાં હિતવક્તારં નમસ્તે ચિત્તશુદ્ધયે ॥ ૧॥

અદ્વૈતાનન્દભરિતં સાધૂનામુપકારિણમ્ ।
સર્વશાસ્ત્રવિદં શાન્તં નમસ્તે ચિત્તશુદ્ધયે ॥ ૨॥

ધર્મભક્તિજ્ઞાનમાર્ગપ્રચારે બદ્ધકઙ્કણમ્ ।
અનુગ્રહપ્રદાતારં નમસ્તે ચિત્તશુદ્ધયે ॥ ૩॥

ભગવત્પાદપાદાબ્જવિનિવેશિતચેતસઃ ।
શ્રીચન્દ્રશેખરગુરોઃ પ્રસાદો મયિ જાયતામ્ ॥ ૪॥

ક્ષેત્રતીર્થકથાભિજ્ઞઃ સચ્ચિદાનન્દવિગ્રહઃ ।
ચન્દ્રશેખરવર્યો મે સન્નિધત્તા સદા હૃદિ ॥ ૫॥

પોષણે વેદશાસ્ત્રાણાં દત્તચિત્તમહર્નિશમ્ ।
ક્ષેત્રયાત્રારતં વન્દે સદ્ગુરું ચન્દ્રશેખરમ્ ॥ ૬॥

વેદજ્ઞાન્ વેદભાષ્યજ્ઞાન્ કર્તું યસ્ય સમુદ્યમઃ ।
ગુરુર્યસ્ય મહાદેવઃ તં વન્દે ચન્દ્રશેખરમ્ ॥ ૭॥

મણિવાચકગોદાદિ ભક્તિવાગમૃતૈર્ભૃશમ્ ।
બાલાનાં ભગવદ્ભક્તિં વર્ધયંતં ગુરું ભજે ॥ ૮॥

લઘૂપદેશૈર્નાસ્તિક્યભાવમર્દન કોવિદમ્ ।
શિવં સ્મિતમુખં શાન્તં પ્રણતોઽસ્મિ જગદ્ગુરુમ્ ॥ ૯॥

વિનયેન પ્રાર્થયેઽહં વિદ્યાં બોધય મે ગુરો ।
માર્ગમન્યં ન જાનેઽહં ભવન્તં શરણં ગતઃ ॥ ૧૦॥

ઇતિ શ્રી વિજયેન્દ્રસરસ્વતિ રચિતમ્ શ્રી ચન્દ્રશેખરેન્દ્ર
સરસ્વતી સ્તુતિ સમ્પૂર્ણમ્॥

The phrase vedaj nAn vedabhAShyaj nAn says that he turned people who (merely) knew Vedas (by recitation) into ones who knew the commentary, thus developed understanding of what they recited. AS.

Encoded by Manda Krishna Srikanth http://www.krishnasrikanth.com
Proofread by MK Srikanth, Sunder Hattangadi,
Avinash Sathaye

---

*shrI chandrashekharendrasarasvatI stuti*
pdf was typeset on November 21, 2020

Please send corrections to *sanskrit@cheerful.com*